shrIrAdhikAShTottarashatanAmAvaliH

# श्रीराधिकाष्टोत्तरशतनामावलिः

## Document Information

Text title : rAdhikAShTottarashatanAmAvaliH

File name : rAdhikAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, rAdhA, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीराधिकाष्टोत्तरशतनामावलिः

राधायै नमः । गन्धर्विकायै । गोष्ठयुवराजैककामितायै ।
गन्धर्वाराधितायै । चन्द्रकान्त्यै । माधवसङ्गिन्यै ।
दामोदराद्वैतसख्यै । कार्तिकोत्कीर्तिदेश्वर्यै ।
मुकुन्ददयितावृन्दधम्मिल्लमणिमञ्जर्यै । भास्करो पासिकायै ।
वृषभानुजाय् । अनङ्गमञ्जरीज्येष्ठायै । श्रीदामावरजोत्तमायै ।
कीर्तिदाकन्यकायै । मातृस्नेहपीयूषपुत्रिकायै । विशाखासवयसे ।
प्रेष्ठविशाखाजीविताधिकायै । प्राणाद्वितीयललितायै ।
वृन्दावनविहारिण्यै नमः ॥ २०

ललिताप्राणरक्षैकलक्षायै नमः । वृन्दावनेश्वर्यै ।
व्रजेन्द्रगृहिण्यै । कृष्णप्रायस्नेहनिकेतनायै ।
व्रजगोगोपगोपालीजीवमात्रैकजीवनायै । स्नेहलाभीरराजेन्द्रायै ।
वत्सलायै । अच्युतपूर्वजायै । गोविन्दप्रणयाधारायै ।
सुरभीसेवनोत्सुकायै । धृतनन्दीश्वरक्षेमायै । गमनोत्कण्ठिमानसायै ।
स्वदेहाद्वैतताद्दष्टधनिष्ठाध्येयदर्शनायै ।
गोपेन्द्रमहिषीपाकशालावेदिप्रकाशिकाय ।
आयुर्वर्धाकरद्धानारोहिणीघ्रातमस्तकायै । सुबलान्यस्तसारूप्यायै ।
सुबलाप्रीतितोषितायै । मुखराद्दक्सुधानप्त्र्यै ।
जटिलाद्दष्टिभासितायै । मधुमङ्गलनर्मोक्तिजनितस्मितचन्द्रिकायै ।
पौर्णमासीबहिःखेलत्प्राणपञ्जरसारिकायै नमः ॥ ४०

स्वगणाद्वैतजीवातवे नमः । स्वीयाहङ्कारवर्धिन्यै ।
स्वगणोपेन्द्रपादाब्जस्पर्शालम्भनहर्षिण्यै ।
स्वीयवृन्दावनोद्यानपालिकीकृतवृन्दकायै ।
ज्ञातवृन्दाटवीसर्वलतातरुमृगद्विजायै ।
ईषच्चन्दनसङ्घृष्टनवकाश्मीरदेहभासे । जपापुष्पहप्रीतहर्यै ।
पट्टचीनारुणाम्बरायै । चरणाब्जतलज्योतिररुणीकृतभूतलायै ।

हरिचित्तचमत्कारिचारुनूपुरनिःस्वनायै ।
कृष्णश्रान्तिहरश्रेणीपीठवल्गितघण्टिकायै ।
कृष्णसर्वस्वपीनोद्यत्कुचाञ्चन्मणिमालिकायै ।
नानारत्नोल्लसच्छङ्खचूडचारुभुजद्वयायै ।
स्यमन्तकमणिभ्राजन्मणिभ्राजन्मणिबन्धातिबन्धुरायै ।
सुवर्णदर्पणज्योतिरुल्लङ्घिमुखमण्डलायै ।
पक्वदाडिमबीजाभदन्ताकृष्टाघभिच्छुकायै ।
अब्जरागादिसृष्टाब्जकलिकाकर्णभूषणायै । सौभाग्यकज्जलाङ्काक्त-
नेत्रानन्दितखञ्जनायै । सुवृत्तमौक्तिकामुक्तानासिकातिलपुष्पिकायै ।
सुचारुनवकस्तूरीतिलकाञ्चितभालकायै ॥ ६०

दिव्यवेणीविनिर्धूतकेकीपिञ्छवरस्तुत्यै ।
नेत्रान्तसारविध्वंसकृतचाणूरजिद्धृत्यै ।
स्फुरत्कैशोरतारुण्यसन्धिबन्धुरविग्रहायै ।
माधवोल्लासकोन्मत्तपिकोरुमधुरस्वरायै ।
प्राणायुतशतप्रेष्ठमाधवोत्कीर्तिलम्पटायै ।
कृष्णापाङ्गतरङ्गोद्यत्स्मितपीयूषबुद्बुदायै ।
पुञ्जीभूतजगल्लज्जावैदग्धीदिग्धविग्रहायै । करुणाविद्रवद्देहायै ।
मूर्तिमन्माधुरीघटायै । जगद्गुणवतीवर्गगीयमानगुणोच्चयायै ।
शच्यादिसुभगावृन्दवन्द्यमानोरुसौभगायै ।
वीणावादनसङ्गीतरसलास्यविशारदायै । नारदप्रमुखोद्गीत-
जगदानन्दिसद्यशसे । गोवर्धनगुहागेहगृहिणीकुञ्जमण्डनायै ।
चण्डांशुनन्दिनीबद्धभगिनीभावविभ्रमायै ।
दिव्यकुन्दलतानर्मसख्यदामविभूषणायै ।
गोवर्धनधराह्लादिशृङ्गाररसपण्डितायै ।
गिरीन्द्रधरवक्षःश्रियै । शङ्खचूडारिजीवनाय ।
गोकुलेन्द्रसुतप्रेमकामभूपेन्द्रपट्टणाय नमः ॥ ८०

वृषविध्वंसनर्मोक्तिस्वनिर्मितसरोवरायै ।
निजकुण्डजलक्रीडाजितसङ्कर्षणानुजाय ।
मुरमर्दनमत्तेभविहारामृतदीर्घिकायै ।
गिरीन्द्रधरपारीन्द्ररतियुद्धोरुसिंहिकाय ।
स्वतनूसौरभोन्मत्तीकृतमोहनमाधवायै ।

दोर्मूलोच्चलनक्रीडाव्याकुलीकृतकेशवायै ।
निजकुण्डतटीकुञ्जक्लृप्तकेलीकलोद्यमायै ।
दिव्यमल्लीकुलोल्लासिशय्याकल्पितविग्रहायै ।
कृष्णवामभुजन्यस्तचारुदक्षिणगण्डकायै ।
सव्यबाहुलताबद्धकृष्णदक्षिणसद्भुजायै ।
कृष्णदक्षिणचारूरुश्लिष्टवामोरुरम्भिकायै ।
गिरीन्द्रधरदृग्वक्षोमर्दिसुस्तनपर्वतायै ।
गोविन्दाधरपीयूषवासिताधरपल्लवायै ।
सुधासञ्चयचारूक्तिशीतलीकृतमाधवायै ।
गोविन्दोद्गीर्णताम्बूलरागरज्यत्कपोलिकायै ।
कृष्णसम्भोगसफलीकृतमन्मथसम्भवायै ।
गोविन्दमार्जितोद्दामरतिप्रस्विन्नसन्मुखायै ।
विशाखावीजितक्रीडाशान्तिनिद्रालुविग्रहायै ।
गोविन्दचरणन्यस्तकायमानसजीवनायै ।
स्वप्राणार्बुदनिर्मञ्छ्यहरिपादरजःकणायै नमः ॥ १००

अणुमात्राच्युतादर्शशप्यमानात्मलोचनायै नमः ।
नित्यनूतनगोविन्दवक्त्रशुभ्रांशुदर्शनायै ।
निःसीमहरिमाधुर्यसौन्दर्याद्येकभोगिन्यै ।
सापत्न्यधाममुरलीमात्रभाग्यकटाक्षिण्यै ।
गाढबुद्धिबलक्रीडाजितवंशीविकर्षिण्यै ।
नर्मोक्तिचन्द्रिकोत्फुल्लकृष्णकामाब्धिवर्धिन्यै ।
व्रजचन्द्रेन्द्रियग्रामविश्रामविधुशालिकायै ।
कृष्णसर्वेन्द्रियोन्मादिराधेत्यक्षरयुग्मकायै नमः ॥ १०८

इति श्रीराधिकाष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran

*shrIrAdhikAShTottarashatanAmAvaliH*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*